इक्षुः। इति राजनिर्घण्टः॥ फललताविशेषः॥ काँकरोल इति भाषा। तत्पर्य्यायः। किलासघ्नः २ तिक्तपत्रः ३ सुगन्धकः ४। इति हेमचन्द्रः॥ अस्य गुणाः। शुक्रकफपित्तनाशित्वम्। रुचिकारित्वञ्च। इति राजवल्लभः॥ ("तद्वत् कर्क्कोटकं प्रोक्तम्"॥ इति सुश्रुते। सूत्रे। ४६ अध्याये॥ विशेषश्चास्यैर्व्वारुकशब्दे प्रदर्शितः॥)

कर्क्कोटकी, स्त्री, (कर्क्कोटक+गौरादित्वात् ङीष्।) पीतघोषा वृक्षः। इति रत्नमाला॥ (अस्याः पर्य्यायमाह चरकः कल्पे ४ अध्याये।
"कर्क्कोटकी कटुफला महाजालिनिरेव च।
धामार्गवस्य पर्य्याया राजकोशातकी यथा"॥
विशेषविवरणञ्चास्या धामार्गवशब्दे ज्ञातव्यम्॥ फललताविशेषः। काँकुड़ इति भाषा॥ एतद्-फलगुणपाकादि उक्तं वैद्यके। यथा,—
"कर्क्कोटकी फलं कुष्ठहृल्लासारुचिनाशनम्।
श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम्॥
ईषद्विभिन्नमरिचैः परिपूर्णगर्भं
तैलेन रन्धितसुसैन्धवपातयोगम्।
वाह्लीकयुक्तपयसा विहिताभिषेकं
कर्क्कोटकीफलमिदं रुचिकृत्तरुण्यम्"॥)

कर्क्कोटिका, स्त्री, (कर्क्कोट+स्वार्थे कन् तत टाप् अत इत्वञ्च।) कर्क्कोटकः। काँकरोल इति भाषा। तत्पर्य्यायः। कुष्माण्डी २ कर्क्कोटी ३। तत्फलम् कारवेल्लकतुल्यगुणम्। इति राजनिर्घण्टः॥

कर्च्चरिका, स्त्री, कं सुखं यथा तथा चर्य्यते उपयुज्यते यद्वा कं जलं चुर्य्यते शून्यीक्रियतेऽत्र। क+चर्+वा चुर्+पृषोदरात् रेफादेशे कनादिभिः साधुः।) पिष्टकविशेषः। इति पाकराजेश्वरः। कचुरी इति भाषा॥

कर्च्चूरं, क्ली, (कर्ज्ज+खर्ज्जूरादित्वात् ऊरः। पृषोदरादित्वात् जकारस्य चकारे साधुः।) कर्ब्बुरम्। स्वर्णम्। कचुरमपिपाठः। इत्यमरटीका॥

कर्च्चूरः, पुं, (कर्ज्ज+ऊरः। पृषोदरादित्वात् साधुः।) वृक्षविशेषः। कचूर इति भाषा। तत्पर्य्यायः। द्राविड़ः २ कर्शः ३ दुर्लभः ४ गन्धमूलकः ५ वेधमुख्यः ६ गन्धसारः ७ जटालः ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। कफकासगलगण्डादिदोषनाशित्वम्। मुखवैशद्यजननत्वञ्च। इति राजनिर्घण्टः॥ (यथा चरके सूत्रे २७ अध्याये।
"रोचनो दीपनो हृद्यः सुगन्धिस्त्वग्विवर्ज्जितः।
कर्च्चूरः कफवातघ्नः श्वासहिक्कार्शसां हितः"॥)

कर्च्चूरकः, पुं, (कर्च्चूरं स्वर्णमिव कायति प्रकाशते। कर्च्चूर+कै+कः। कर्च्चूर+स्वार्थे कन् वा।) कर्ब्बूरकः। इत्यमरटीकायां स्वामी। काँचा हलुद इति भाषा॥

कर्ज्ज पीड़े। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) कर्ज्जति। इति दुर्गादासः॥

कर्ण त् क भिदि। इति कविकल्पद्रुमः॥ (अदन्तचुरां-परं-सकं-सेट्।) कर्णयति कर्णापयति। आङ्पूर्व्वोऽयं श्रवणे। देवाकर्णय येन येन सहसा यद्यत् समासादितमिति। उपसर्गास्तत्तदर्थानां द्योतका एव न तु वाचकाः। केवलधातोरनेकार्थत्वेऽवश्यवक्तव्ये उपसर्गपूर्व्वस्याप्यन्यार्थो धातोरेव कल्प्यते लाघवात्। क्वचिदुपसर्गा धात्वर्थमेवानुवर्त्तन्ते। तथा च।
"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा"॥
इति विस्तरवृत्तिः॥ क्रमेणोदाहरणानि। आदत्ते गृह्णातीत्यर्थः। प्रसूयतेऽत्र प्रसव एव धात्वर्थः। प्रशब्दस्तमेवार्थं द्योतयति। प्रणमति प्रकर्षेण नमतीत्यर्थः। केचित्तु अनर्थकोऽन्यः प्रयुज्यते। इति चतुर्थचरणं पठन्ति तच्चिन्त्यम्। इति दुर्गादासः॥

कर्णः, पुं, (कीर्य्यते क्षिप्यते। शब्दो वायुना यत्र। किरति शब्दग्रहणेन मनसि सुखं क्षिपति ददातीत्यर्थः। कॄ श विक्षेपे+"कॄवृजॄसीति" नन् निच। उणां ३। १०। यद्वा कर्ण्यते आकर्ण्यते अनेन। कर्ण+करणे अप्।) श्रवणेन्द्रियम्। काण इति भाषा। तत्पर्य्यायः। शब्दग्रहः २ श्रोत्रम् ३ श्रुतिः ४ श्रवणम् ५ श्रवः ६। इत्यमरः। २। ६। ९४॥ श्रोत्रम् ७। इति तट्टीका॥ वचोग्रहः ८। इति राजनिर्घण्टः॥
(यथा रघः। १। ९।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः"॥)
कर्णस्तु श्रवणेन्द्रियस्य गोलकं स्थानम्। तत्र श्रोत्रमिन्द्रियम्। तत्तु कर्णशष्कुल्यवच्छिन्ननभोभागः। तस्य देवता दिक्। विषयः शब्दः। इति श्रीभागवतम्॥ युधिष्ठिराग्रजः। स तु कुन्त्याः कन्याकाले सूर्य्यौरसजातः। एतेन कानीन इत्याख्ययापि प्रसिद्धः। अस्य जन्मादिविवरणन्तु महाभारते १। १११ अध्याये द्रष्टव्यं॥ तत्पर्य्यायः। राधेयः २ वसुषेणः ३ अर्कनन्दनः ४ घटोत्कचान्तकः ५ चाम्पेशः ६ सूतपुत्त्रकः ७। इति त्रिकाण्डशेषः॥ चाम्पाधिपः ८ अङ्गराट् ९ राधासुतः १० अर्कतनयः ११। इति हेमचन्द्रः॥ अङ्गाधिपः १२। इति भूरिप्रयोगः॥ (यथा महाभारते। १। सम्भवपर्व्वणि १११। ३१।
"प्राङ्नाम तस्य कथितं वसुषेण इति क्षितौ।
कर्णो वैकर्त्तनश्चैव कर्म्मणा तेन सोऽभवत्"॥
अयं हि दातृणामग्रगण्यः। अस्य किमपि नादेयमासीत्। अन्यैरभेद्यं सहजमपि स्वदेहकवचं शरीरात् समुत्कृत्य ब्राह्मणरूपधारिणे याचमानाय इन्द्राय दत्तवान् तथा उपोषितं द्विजरूपधारिणं विष्णुं स्वपुत्त्रमांसेन प्रीणयामास। एतद्विवरणन्तु जैमिनिभारते सुव्यक्तमस्त्येव। अयं परशुरामशिष्यो महावीर्य्यः भारतयुद्धे दुर्य्योधनपक्षावलम्बी आसीत्। अष्टादशदिवसव्यापि भारतसंग्रामे भीष्मदेवः सेनापतिपदमधिरुह्य दशाहं यावत् युद्धमकरोत्। ततः शरशय्यां गते तस्मिन् द्रोणश्चतुर्द्दिनानि अयुध्यत। एतस्मिन्नेव समयेऽयं कर्णोऽपि स्वसेनाबलमादाय पाण्डवैः सह युयुधे। ततो गतजीविते द्रोणे सैनापत्यमधिरूढ़ोऽसौ दिवसद्वयं वियुध्य कृष्णसहायेनार्ज्जुनेन निहत आसीत्॥) सुवर्णालिवृक्षः। इति मेदिनी॥ (धृतराष्ट्रशतपुत्त्रेषु एकः पुत्त्रः। यथा महाभारते १। ११७। ३।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च"।
नौकायाः क्षेपणीविशेषः। (दाँड़ इति भाषा॥ यथा रामायणे ६। २३। ३०।
"हतप्रवीरा विध्वस्ता निरुत्साहा निरुद्यमा।
सेना भवति संग्रामे हतकर्णेव नौर्जले"॥
कर्णः अस्त्यस्य प्राशस्त्येन। अर्श आद्यच्। दीर्घकर्णे त्रि, यथा यजुर्व्वेदे। २। ४। ४०।
"खङ्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्द्दभः"॥)

कर्णकण्डुः, पुं, (कर्णस्य कर्णे वा जातो कण्डुः।) कर्णरोगविशेषः। तस्य निदानम्। "मारुतः कफसंयुक्तः कर्णकण्डुं करोति च"। इति माधवकरः॥
("कफेन कण्डूः प्रचितेन कर्णयो-
र्भृशं भवेत् स्रोतसि कर्णसंश्रिते"॥
इति सुश्रुते उत्तरतन्त्रे २० अध्याये।
चिकित्सास्य यथा।
"विधिश्च कफहृत्सर्व्वः कर्णकण्डूमपोहति"॥
इति तत्रैवोत्तरतन्त्रे २१ अध्याये॥)

कर्णकीटी, स्त्री, (कर्णे स्थितः कर्णस्य भेदकः क्षुद्रः कीटी कीटविशेषः। यद्वा कर्णयति भिनत्ति तादृशी कीटी। कर्ण+अच्। स्वल्पः कीटः कीटी स्वल्पार्थे ङीष् ततः कर्म्मधारयः।) कीटविशेषः। काणकोटारी केन्नाइ इत्यादि भाषा। तत्पर्य्यायः। कर्णजलौका २ शतपदी ३। इति हेमचन्द्रः॥ चित्राङ्गी ४। इति राजनिर्घण्टः॥ पृथिका ५ कर्णदुन्दुभिः ६। इति शब्दमाला॥

कर्णक्ष्वेड़ः, पुं, (कर्णस्य कर्णे जातः क्ष्वेड़ो वा।) कर्णरोगविशेषः। (तस्य लक्षणम्।
"वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम्।
करोति कर्णयोः क्ष्वेड़ं कर्णक्ष्वेड़ः स उच्यते"॥
इति माधवकरः॥ कर्णरोगशब्देऽस्यापि विस्तृतसनिदानचिकित्सितादिकं ज्ञेयम्॥)

कर्णगूथं, क्ली, (कर्णस्य कर्णे स्थितं कर्णजातं वा गूथं मलम्।) कर्णमलम्। इति हारावली। काणेर खलि इति भाषा॥

कर्णगूथकः, पुं, (कर्णगूथ+संज्ञायां कन्। कर्णगूथमिव कायति वा। कै+कः।) कर्णरोगविशेषः। तस्य निदानम्। यथाह माधवकरः।
"पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः"॥
("विशोषिते श्लेष्मणि पित्ततेजसा
नृणां भवेत् स्रोतसि कर्णगूथकः"॥
इति सुश्रुते उत्तरतन्त्रे २० अध्याये॥
चिकित्सास्य वैद्यकचक्रपाणिसंग्रहे॥ यथा,
"क्लेदयित्वा तु तैलेन स्वेदेन प्रविलाप्य च।
शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया"॥)

कर्णजलूका, स्त्री, (कर्णस्य कर्णे वा जलूका इव।) कर्णकीटी। इति शब्दरत्नावली॥

कर्णजलोका, स्त्री, (कर्णे जलौकेव।) शतपदी। इत्यमरः। २। ५। १३॥

कर्णजलौकाः, [स्] स्त्री, (कर्णे जलौका इव।) कर्ण-